Brahma, the creator of the universe 20.

1 2 3 4 5 6
ब्रह्मा स्रष्टा परमेष्ठी धाता पद्मभू: सुरज्येष्ठ: ।
7 8 9 10 11
वेधा विधिर्विरिञ्चो हिरण्यगर्भ: शतानन्द: ॥ ६ ॥
12 13 14 15 16
शम्भु: स्वयम्भूर्द्रुहिणश्चतुर्वक्त्र: प्रजापति: ।
17 18 19 20
पितामहो जगत्कर्ता विरञ्चि: कमलासन: ॥ ७ ॥

The goddess of speech 8.

1 2 3 4 5 6 7 8
वाग्वाणी भारती भाषा गौर्गीर्ब्राह्मी सरस्वती ।

'Om' one mystic syllable 2.

1 2
ओङ्कार: प्रणव: प्रोक्तस्त्रयो वेदास्त्रयी स्मृता: ॥ ८ ॥

The vedas, the oldest sacred writings 6.

1 2 3 4 5 6
वेद: श्रुतिस्तथाम्नाय: स्वाध्यायश्छन्द आगम: ।

Upanishad the scope of vedas 3.

a 1 2 3
वेदान्तश्च रहस्यं च बुधैरुपनिषन्मता ॥ ९ ॥

Reasoning logic 3.

1 2 3 1 2
ऊहस्तर्कोऽनुमानोक्तिर्मीमांसा स्याद्विचारणा ।

Investigation or discussion of the vedas 2.

Established truth or doctrine, a dogma 4.

1 2 3 4
स्मृता: कृतान्तराद्धान्तसिद्धान्तसमया: समा: ॥ १० ॥

Name of Shiva 45.

1 2 3 4 5 6
ईशान: शशिशेखर: पशुपति: शूली शिव: शङ्कर: ,
7 8 9 10 11 12 13
शर्व: शम्भुरुमापतिश्च गिरिश: श्रीकण्ठ उग्रो हर: ।
14 15 16 17 18 19
सर्वज्ञस्त्रिपुरान्तकस्त्रिनयनो रुद्र: कपर्दी भवो ,
20 21 22 23
भूतेश: परमेश्वरोऽन्धकरिपुर्दक्षाध्वरध्वंसकृत् ॥ ११ ॥
24 25 26 27
स्थाणु: स्रष्टा धूर्जटिर्वामदेव: ,
28 29 30
कामध्वंसी व्योमकेश: कपाली ।
31 32 33
नीलग्रीवो वह्निरेता: पिनाकी ,
34 35 36 37
भीमो भर्ग: कृत्तिवासा वृषाङ्क: ॥ १२ ॥
b 38 39 40 41
अहिर्बुध्नो विरूपाक्ष: शिपिविष्टो गणाधिप: ।
42 43 44 45
गङ्गाधरो महादेवो मृड: स्यान्नीललोहित: ॥ १३ ॥

a वेदाङ्कुरश्च, वेदान्तस्य b अहिर्ब्रध्नो, अहिर्बुध्न्यो, अहिर्बुध्न्वा ।